# shrI siddhivinAyaka stotram

# શ્રીસિદ્ધિવિનાયકસ્તોત્રમ્

## Document Information

Text title : siddhivinAyaka stotram

File name : siddhivinaayaka.itx

Category : ganesha, stotra

Location : doc_ganesha

Transliterated by : M Suresh msuresh at altavista.net

Proofread by : M Suresh msuresh at altavista.net

Latest update : December 25, 1998

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીસિદ્ધિવિનાયકસ્તોત્રમ્

જયોઽસ્તુ તે ગણપતે દેહિ મે વિપુલાં મતિમ્ ।
સ્તવનમ્ તે સદા કર્તું સ્ફૂર્તિ યચ્છમમાનિશમ્ ॥ ૧॥

પ્રભું મંગલમૂર્તિં ત્વાં ચન્દ્રેન્દ્રાવપિ ધ્યાયતઃ ।
યજતસ્ત્વાં વિષ્ણુશિવૌ ધ્યાયતશ્ચાવ્યયં સદા ॥ ૨॥

વિનાયકં ચ પ્રાહુસ્ત્વાં ગજાસ્યં શુભદાયકમ્ ।
ત્વન્નામ્ના વિલયં યાન્તિ દોષાઃ કલિમલાન્તક ॥ ૩॥

ત્વત્પદાબ્જાઙ્કિતશ્ચાહં નમામિ ચરણૌ તવ ।
દેવેશસ્ત્વં ચૈકદન્તો મદ્વિજ્ઞપ્તિં શ‍ૃણુ પ્રભો ॥ ૪॥

કુરુ ત્વં મયિ વાત્સલ્યં રક્ષ માં સકલાનિવ ।
વિઘ્નેભ્યો રક્ષ માં નિત્યં કુરુ મે ચાખિલાઃ ક્રિયાઃ ॥ ૫॥

ગૌરિસુતસ્ત્વં ગણેશઃ શૃણુ વિજ્ઞાપનં મમ ।
ત્વત્પાદયોરનન્યાર્થી યાચે સર્વાર્થ રક્ષણમ્ ॥ ૬॥

ત્વમેવ માતા ચ પિતા દેવસ્ત્વં ચ મમાવ્યયઃ ।
અનાથનાથસ્ત્વં દેહિ વિભો મે વાંછિતં ફલમ્ ॥ ૭॥

લમ્બોદરસ્વમ્ ગજાસ્યો વિભુઃ સિદ્ધિવિનાયકઃ ।
હેરમ્બઃ શિવપુત્રસ્ત્વં વિઘ્નેશોઽનાથબાંધવઃ ॥ ૮॥

નાગાનનો ભક્તપાલો વરદસ્ત્વં દયાં કુરુ ।
સિન્દૂરવર્ણઃ પરશુહસ્તસ્ત્વં વિઘ્નનાશકઃ ॥ ૯॥

વિશ્વાસ્યં મઙ્ગલાધીશં વિઘ્નેશં પરશૂધરમ્ ।
દુરિતારિં દીનબન્ધૂં સર્વેશં ત્વાં જના જગુઃ ॥ ૧૦॥

નમામિ વિઘ્નહર્તારં વન્દે શ્રીપ્રમથાધિપમ્ ।
નમામિ એકદન્તં ચ દીનબન્ધૂ નમામ્યહમ્ ॥ ૧૧॥

નમનં શમ્ભુતનયં નમનં કરુણાલયમ્ ।
નમસ્તેઽસ્તુ ગણેશાય સ્વામિને ચ નમોઽસ્તુ તે ॥ ૧૨॥

નમોઽસ્તુ દેવરાજાય વન્દે ગૌરીસુતં પુનઃ ।
નમામિ ચરણૌ ભક્ત્યા ભાલચન્દ્રગણેશયોઃ ॥ ૧૩॥

નૈવાસ્ત્યાશા ચ મચ્ચિત્તે ત્વદ્ભક્તેસ્તવનસ્યચ ।
ભવેત્યેવ તુ મચ્ચિત્તે હ્યાશા ચ તવ દર્શને ॥ ૧૪॥

અજ્ઞાનશ્ચૈવ મૂઢોઽહં ધ્યાયામિ ચરણૌ તવ ।
દર્શનં દેહિ મે શીઘ્રં જગદીશ કૃપાં કુરુ ॥ ૧૫॥

બાલકશ્ચાહમલ્પજ્ઞઃ સર્વેષામસિ ચેશ્વરઃ ।
પાલકઃ સર્વભક્તાનાં ભવસિ ત્વં ગજાનન ॥ ૧૬॥

દરિદ્રોઽહં ભાગ્યહીનઃ મચ્ચિત્તં તેઽસ્તુ પાદયોઃ ।
શરણ્યં મામનન્યં તે કૃપાલો દેહિ દર્શનમ્ ॥ ૧૭॥

ઇદં ગણપતેસ્તોત્રં યઃ પઠેત્સુસમાહિતઃ ।
ગણેશકૃપયા જ્ઞાનસિધ્ધિં સ લભતે ધનમ્ ॥ ૧૮॥

પઠેદ્યઃ સિદ્ધિદં સ્તોત્રં દેવં સમ્પૂજ્ય ભક્તિમાન્ ।
કદાપિ બાધ્યતે ભૂતપ્રેતાદીનાં ન પીડયા ॥ ૧૯॥

પઠિત્વા સ્તૌતિ યઃ સ્તોત્રમિદં સિદ્ધિવિનાયકમ્ ।
ષણ્માસૈઃ સિદ્ધિમાપ્નોતિ ન ભવેદનૃતં વચઃ
ગણેશચરણૌ નત્વા બ્રૂતે ભક્તો દિવાકરઃ ॥ ૨૦॥

ઇતિ શ્રી સિદ્ધિવિનાયક સ્તોત્રમ્ ।

Encoded by Suresh Vyas (mltipure at twrol.com)

Date: Fri, 25 Dec 1998

*shrI siddhivinAyaka stotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*